# ५०. परीक्षायै सज्जता

सप्तमी बहुवचनम्

शिक्षकः - छात्राः ! परीक्षा सन्निहिता अस्ति। सम्यक् पठन्तु।

अनन्तः - परीक्षा कुत्र प्रचलिष्यति ?

शिक्षकः - सर्वेषु प्रकोष्ठेषु (कक्ष्यासु) क्रमसंख्यां स्थापयामः। परीक्षा अस्माकं विद्यालये एव भविष्यति। इदानीं सर्वे अपि छात्राः बहिः गच्छन्तु।

अनन्तः - किमर्थम् आचार्य। अद्य एव संख्यां स्थापयन्ति किम् ?

शिक्षकः - इदानीं भवन्तः सर्वेषु प्रकोष्ठेषु स्वच्छतां कुर्वन्तु। उत्पीठिकासु अपि धूलिं मार्जयन्तु। कृष्णफलकेषु अपि धूलिं मार्जयित्वा दिनाङ्कादिकं लिखन्तु।

राजीवः - आचार्य ! सर्वेऽपि कार्यं न कुर्वन्ति। केचन बहिः अटन्ति।

शिक्षकः - बालकेषु एकं प्रमुखं करोमि। बालिकासु एकां प्रमुखां करोमि, यदि क्रीडाङ्गणेषु क्रीडन्ति तर्हि दण्डम् आनयामि। केचन द्रोणीषु जलं पूरयित्वा आनयन्तु।

मालती - मार्जनार्थं वस्त्राणि कुत्र सन्ति ?

शिक्षकः - वस्त्राणि वस्तुसङ्ग्रहप्रकोष्ठे सन्ति। तत्र गत्वा आनयन्तु।

छात्राः - आचार्य। वयं गच्छामः। सज्जतां कुर्मः।